# A-I/1/22AVYS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम् (DSCC-16)**

**व्याकरणम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. माहेश्वरसूत्राणां सूत्रभेदेषु क्वान्तर्भावः?
2. नागेशस्य पित्रोः नाम किम्?
3. माहेश्वराणीति शब्दस्य कः अर्थः?
4. अनेकान्तशब्दस्य कः अर्थः?
5. ऋलृवर्णयोः इत्यत्र कथं विग्रहः?
6. न वेत्यादिसूत्रे इति शब्दः कीदृशः?
7. येन विधिरिति सूत्रे येनेत्यत्र कस्मिन्नर्थे तृतीया?
8. मिदचोऽन्त्यात्परः इति सूत्रस्यैकमुदाहरणं लिखत।
9. स्वरितेनाधिकारः इत्यत्र केन सूत्रेण तृतीया?
10. 'आदिरन्त्येन.' इति सूत्रे आदिग्रहणं किमर्थम्?
11. न पदान्तसूत्रं विलिख्य तस्यार्थं लिखत।
12. धातोस्तन्निमित्तस्यैव इत्यत्र धातुग्रहणाभावे को दोषः?
13. क्षय्यजय्यौ शक्यार्थे इति सूत्रे कयोः धात्वोः ग्रहणम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. आदिरन्त्येन सहेता इति सूत्रं नागेशदिशा व्याख्यात।
15. ऊकालोऽज्झस्वदीर्घप्लुतः इति सूत्रं नागेशदिशा व्याख्यात।

16. ‘वृद्धिरादैच्’ इति सूत्रं नागेशरीत्या व्याख्यात।

17. ‘अइउण्’ इत्यादिषु सन्ध्यभावं निरूपयत।

18. ‘अन्तादिवच्च’ इति सूत्रं व्याख्यात।

19. सुप्तिङन्तं पदमिति सूत्रं नागेशदिशा व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. ‘उपदेशे इदन्त्यम्’ ‘अच्’ ‘अनुनासिकः’ इति अन्योन्याश्रयदोषवारणोपायमुपस्थापयत।

21. पूर्वत्रासिद्धमिति सूत्रं नागेशदिशा व्याख्यात।

22. ‘स्थानिवदादेशोऽनल्विधौ’ इति सूत्रं विचारयत।

**अथवा**

## व्याकरणम्

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. अकारस्य विवृतोपदेशः कुतः?
2. 'वृद्धिरादैच्' इत्यत्र कुत्वं कस्मात् न भवति?
3. 'अनुवृत्तिनिर्देशः' नाम कः?
4. अयोगवाहाः के?
5. हकारस्य परोपदेशे प्रयोजनद्वयं लिखत।
6. व्याकरणे वर्णेनापि अनर्थकेन भवितुं कुतः अशक्यम्?
7. इको गुणवृद्धी इत्यत्र 'इक्' ग्रहणं किमर्थम्?
8. 'अण्' प्रत्याहरः पूर्वेण णकारेण परेण वा?
9. वृद्धिगुणौ अलोऽन्त्यस्य इत्युक्ते के दोषा भवन्ति?
10. वृद्धिरादैजित्यत्र तद्भावितानां ग्रहणमुत अतद्भावितानां ग्रहणम्?
11. संज्ञाधिकारः किमर्थः?
12. मङ्गलं किमर्थं कर्तव्यम्?
13. गुणानामभेदकत्वे किमुदाहरणम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. 'आकृतिग्रहणात् सिद्धम्' इति वार्तिकस्याशयं यथाभाष्यं वर्णयत।
15. सन्ध्यक्षराणाम् अतपरोपदेशे के दोषा भवन्ति?

16. 'अनुबन्धसङ्करस्तु' अस्य क आशयः?

17. वृद्धिरादैजित्यत्र अन्योन्याश्रयपरिहारः कथम्?

18. संज्ञया विधाने नियमः इति वार्तिकाशयं वर्णयत।

19. वृद्धिरादैजित्यत्र किमर्थम् आकारः तपरः क्रियते? विचारयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. वृद्धिरादैच् इत्यस्य संज्ञासूत्रत्वं भाष्यकारोक्तदिशा व्यवस्थापयत।

21. इको गुणवृद्धी इति सूत्रे तच्छेषतदपवादपक्षौ निरूप्य भाष्यसिद्धान्तमुपस्थापयत।

22. अर्थवन्तो वर्णाः, उत अनर्थकाः? यथाभाष्यं निरूपयत।

# A-I/2/22AVYS1CCTC2/23

**प्रथमसत्रार्द्धः**

**द्वितीयपत्रम् (DSCC-17)**

**व्याकरणम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. प्रत्ययपदे तदन्तग्रहणं कया परिभाषया भवति?
2. अर्थवत्सूत्रे अर्थवद्ग्रहस्य किं फलम्?
3. कृत्तद्धितेत्यादिसूत्रे पदशब्देन कस्य ग्रहणम्?
4. वाक्यस्य प्रातिपदिकत्वे को दोषः?
5. स्वप्रकृत्यर्थत्वं नाम किम्?
6. किं नाम प्रकृतित्वम्?
7. बहुषु बहुवचनमित्यत्र बहुशब्दः किंपरः?
8. सन्निपातपरिभाषा किंमूला?
9. बहुवचने झलीक् इति तु न सूत्रितं, किमर्थम्?
10. सर्वादीनि इत्यत्र कः समासः?
11. 'पतिः समास एव' इत्यत्र एवकारः किमर्थः?
12. 'अतोऽम्' इत्यत्र अत इति कस्य विशेषणम्?
13. ह्रस्वो नपुंसके प्रातिपदिकस्येति सूत्रे प्रातिपदिकपदं किमर्थम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रत्ययः इति कीदृशाधिकारः इति विविच्य महासंज्ञाकरणस्य प्रयोजनं निरूपयत।
15. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषां नागेशदिशा व्याख्यात।

16. ‘आदर्शेन’ इत्यत्र णत्ववारणं कथमिति नागेशदिशा व्याख्यात।

17. ‘बहुवचने झल्येत्’ इति सूत्रं व्याख्यात।

18. ‘एच इग्घ्रस्वादेशे’ इति सूत्रं नागेशदिशा व्याख्यात।

19. ‘अतोऽम्’ सूत्रे कः पदच्छेदः? सूत्रार्थश्च कथं सिद्धः नागेशाशयं वर्णयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. अर्थवत्सूत्रं यथाग्रन्थं व्याख्यात।

21. ‘सरूपाणामेकशेष एकविभक्तौ’ इति सूत्रं नागेशदिशा व्याख्यात।

22. नदीसंज्ञाविधायकं सूत्रं नागेशदिशा व्याख्यात।

**अथवा**

## व्याकरणम्

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. 'न धातुलोप आर्धधातुके' इति सूत्रे धातुग्रहणं किमर्थम्?
2. क्ङिति प्रतिषेधे. . . . . . .ग्रहणं कर्तव्यम्।
3. लकारस्य ङित्त्वे को दोषः?
4. दीधीवेवीटामिति सूत्रं किमर्थमुच्यते?
5. अनन्तरा इत्यस्य विग्रहद्वयं किम्?
6. संयोगसंज्ञायां सहग्रहणस्य किं प्रयोजनम्?
7. समुदाये संयोगसंज्ञायां क्व दोषः?
8. 'मुखनासिकावचनः' इत्यस्य कोऽर्थः?
9. नासिकाग्रहणस्य किं प्रयोजनम्?
10. तुल्यास्यप्रयत्नमित्यत्र विग्रहः कः?
11. 'अमी अत्र' इत्यत्र किमर्थम् अयाद्यादेशः प्राप्नोति?
12. 'निपात एकाजनाङ्' इति सूत्रे निपातग्रहणं किमर्थम्?
13. ओत् इति सूत्रस्य किमुदाहरणम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. 'न धातुलोप आर्धधातुके' इति सूत्रस्य प्रत्याख्यानप्रकारं दर्शयत।
15. 'आद्यन्तवदेकस्मिन्' इति सूत्रस्य आरम्भः कुतः इति भाष्याशयं वर्णयत।
16. ईदूदेद्द्विवचनं प्रगृह्यमित्यत्र तपरकरणं किमर्थम्?

17. 'नाज्झलौ' इति सूत्रं भाष्यदिशा व्याख्यात।

18. 'मुखनासिकावचनोऽनुनासिक:' इति सूत्रस्य दलप्रयोजनं प्रदर्शयत।

19. दीधीवेवीटामिति सूत्रं यथाभाष्यं व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'हलोऽनन्तरा: संयोग:' इति सूत्रं यथाभाष्यं व्याख्यात।

21. 'इदूतौ च सप्तम्यर्थे' इति सूत्रं यथाग्रन्थं व्याख्यात।

22. 'बहुगणवतुडति संख्या' इति सूत्रं भाष्यानुसारं व्याख्यात।

# A-I/3/22AVYS1CCTC3/23

**प्रथमसत्रार्द्धः**

**तृतीयपत्रम् (DSCC-18)**

**व्याकरणम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. परिभाषेन्दुशेखरस्य मङ्गलश्लोकं लिखत।
2. परिभाषेन्दुशेखरे कीदृशानां परिभाषारूपाणां व्याख्यानं क्रियते?
3. कार्यकालमित्यस्य कः अर्थः?
4. अनेकान्ता इत्यस्य कोऽर्थः?
5. नानुबन्धकृतमनेकाल्त्वमित्यस्य ज्ञापकं किम्?
6. यदागमपरिभाषायाः कोऽर्थः?
7. प्रमाणतः आन्तर्यस्य किमुदाहरणम्?
8. अनिनस्मन्ग्रहणानि...............तदन्तविधिं प्रयोजयन्ति।
9. गवे हितमित्यत्र प्रत्ययलक्षणेन अवादेशः कुतो न?
10. व्यपदेशी इत्यस्य कोऽर्थः?
11. घटपटं घटपटौ इति उभयं कथं सिध्यति?
12. अनन्यवदित्यस्य कोऽर्थः?
13. परिभाषेन्दुशेखरग्रन्थस्य प्रथमप्रकरणस्य नाम किम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. संख्याग्रहणे कृत्रिमाकृत्रिमयोः ग्रहणं कथं सिद्धम्? विवृणुत।
15. 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' इति परिभाषां व्याख्यात।

16. नानुबन्धकृतमसारूप्यमिति परिभाषां व्याख्यात।

17. अण्-इण्-ग्रहणेषु केन प्रत्याहार:? सन्देहवारणोपायं वर्णयत।

18. क्वचिदेकदेशोऽप्यनुवर्तते इति परिभाषां व्याख्यात।

19. भाव्यमान: उकार: सवर्णान् गृह्णति न वा?

**खण्ड: - ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'अर्थवद्ग्रहणे नानर्थकस्य' इति परिभाषां नागेशदिशा व्याख्यात।

21. एकदेशविकृतमनन्यवदिति परिभाषां व्याख्यात।

22. यदागमपरिभाषां वर्णयत।

# A-I/4/22AVYS1CCTC4/23

## प्रथमसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-19)

## व्याकरणम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. वैयाकरणभूषणसारस्य कर्ता कः?
2. विभक्त्यर्थाः के?
3. कर्तृतृतीयायाः कोऽर्थः?
4. करणं कीदृशं स्मृतम्?
5. वृत्तिकारमते सम्प्रदानं कीदृशम्?
6. प्रातिपदिकार्थाः कति? ते च के?
7. कौण्डभट्टदिशा समासः कतिविधः? नामानि लिखत।
8. द्वे वृत्ती के?
9. एकार्थीभावः किमर्थमाश्रितः?
10. नैयायिकानां मते निपाता द्योतकाः, उत वाचकाः?
11. 'तथान्यत्र निपातेऽपि' इति कारिकायाम् अन्यत्रेत्यनेन किं गृह्यते?
12. पञ्चम्यर्थः कः?
13. 'तिङां तिङा' समासस्य किमुदाहरणम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. सुपां सुपेत्यादिकारिकां सोदाहरणं व्याख्यात।
15. करणतृतीयायाः कः अर्थः? कौण्डभट्टरीत्या वर्णयत।

16. एकं नामार्थः इति पक्षं यथाग्रन्थं निरूपयत।
17. 'अत एव गवित्याह' इत्यादिकारिकां व्याख्यात।
18. वृत्तिद्वयं तद्भेदांश्च प्रदर्शयत।
19. द्योतकाः प्रादयो येनेत्यादिकारिकां व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. कौण्डभट्टमतेन शक्तिं निरूपयत।
21. कर्मभेदान् कौण्डभट्टदिशा प्रदर्शयत।
22. निपातानां द्योतकत्वमुत वाचकत्वमिति नागेशभट्टदिशा वर्णयत।